॥भा०द०पू०॥ ॥१३॥

नह्वाऽस्यंतसंवासः कर्हिचित्केनचित्सह॥ राजन्स्वेनाऽपि देहेन किमु जायात्मजादिभिः॥१९॥
एकः प्रसूयते जंतुरेक एव प्रलीयते॥ एकोऽनुभुंक्ते सुकृतमेक एव च दुष्कृतं॥२०॥ अधर्मो-
पचितं वित्तं हरंत्यन्येऽल्पमेधसः॥ संभोजनीयापदेशैर्जलानीव जलौकसः॥२१॥ पुष्णा-
ति यानधर्मेण स्वबुद्ध्या तमपंडितं॥ तेऽकृतार्थं प्रहिण्वंति प्राणा रायः सुतादयः॥२२॥ स्व-
यं किल्विषमादाय तैस्त्यक्तो नार्थकोविदः॥ असिद्धार्थो विशत्यंधं स्वधर्मविमुखस्त-
मः॥२३॥ तस्माल्लोकमिमं राजन्स्वप्नमायामनोरथं॥ वीक्ष्यायम्यात्मनात्मानं समः शां-
तो भव प्रभो॥२४॥ धृतराष्ट्र उवाच॥ यथा वदति कल्याणीं वाचं दानपते भवान्॥ तथानया
न तृप्यामि मर्त्यः प्राप्य यथामृतं॥२५॥ तथापि सूनृता सौम्य हृदि न स्थीयते चले॥ पुत्रानु-
रागविषमे विद्युत्सौदामिनी यथा॥२६॥ ईश्वरस्य विधिं को नु विधुनोत्यन्यथा पुमान्॥ भूमे- ॥राम॥
र्भारावताराय योऽवतीर्णो यदोः कुले॥२७॥ यो दुर्विमर्शपथया निजमाययेदं सृष्ट्वा गु- ॥१३॥
णान्विभजते तदनुप्रविष्टः॥ तस्मै नमो दुरवबोधविहारतंत्रसंसारचक्रगतये परमेश्व-

राय॥२८॥ श्रीशुक उवाच॥ इत्यभिप्रेत्य नृपतेरभिप्रायं स यादवः॥ सुहृद्भिः समनुज्ञातः
पुनर्यदुपुरीमगात्॥२९॥ शशंस रामकृष्णाभ्यां धृतराष्ट्रविचेष्टितं॥ पांडवान्प्रति कौर-
व्य यदर्थं प्रेषितः स्वयं॥३०॥ इति श्रीभागवते महापुराणे दशमस्कंधे धृतराष्ट्रदौर्ज-
ज्ञासानामैकोनपंचाशत्तमोऽध्यायः॥४९॥ संवत् १८९९ शाके १७६४ ज्येष्ठशुद्धदशम्यां

॥भा०द०उ०॥ पृष्ठेनिहतमक्षेणदस्युर्जेना॥२०॥ऋक्षराजबिलंभीममंधेनतमसावृतं॥एकोविवेशभग
॥१८॥ वानवस्थाप्यबहिःप्रजाः॥२१॥तत्रदृष्ट्वामणिश्रेष्ठंबालक्रीडनकंकृतं॥हर्तुंकृतमतिस्तस्मिन्न
वस्थितोऽर्भकांतिके॥२२॥तमपूर्वंनरंदृष्ट्वाधात्रीचुक्रोशभीतवत्॥तच्छ्रुत्वाभ्यद्रवत्क्रुद्धोजांब
वान्बलिनांवरः॥२३॥सवैभगवतातेनयुयुधेस्वामिनात्मनः॥पुरुषंप्राकृतंमत्वाकुपितोना
नुभाववित्॥२४॥द्वंद्वयुद्धंसुतुमुलमुभयोर्विजिगीषतोः॥आयुधाऽश्मद्रुमैर्दोर्भिःक्रव्यार्थे
श्येनयोरिव॥२५॥आसीत्तदष्टविंशाहमितरेतरमुष्टिभिः॥वज्रनिष्पेषपरुषैरविश्रममहर्नि
शं॥२६॥कृष्णमुष्टिविनिष्पातनिष्पिष्टांगोरुबंधनः॥क्षीणसत्वःस्विन्नगात्रस्तमाहाऽतीववि
स्मितः॥२७॥जानेत्वांसर्वभूतानांप्राणओजःसहोबलं॥विष्णुंपुराणपुरुषंप्रभविष्णुमधीश्वरं॥२८॥
त्वंहिविश्वसृजांस्रष्टासृष्टानामपियच्चसत्॥कालःकलयतामीशःपरआत्मातथात्मनां॥२९॥ ॥दम॥
यस्येषदुत्कलितरोषकटाक्षमोक्षैर्वर्त्मादिशत्क्षुभितनक्रतिमिंगिलोऽब्धिः॥सेतुःकृतःस्वय ॥१८॥
शउज्ज्वलिताचलंकारक्षःशिरांसिभुविपेतुरिषुक्षतानि॥३०॥इतिविज्ञातविज्ञानमृक्षराजा

नमच्युतः॥व्याजहारमहाराजभगवान्देवकीसुतः॥३१॥अभिमृश्यारविंदाक्षःपाणिनाशंक
रेणतं॥कृपयापरयाभक्तंप्रेमगंभीरयागिरा॥३२॥मणिहेतोरिहप्राप्तावयमृक्षपतेबिलं॥मि
थ्याभिशापंप्रमृजन्नात्मनोमणिनामुना॥३३॥इत्युक्तःस्वांदुहितरंकन्यांजांबवतीमुदा॥अर्हणार्थं
समणिनाकृष्णायोपजहारह॥३४॥अदृष्ट्वानिर्गमंशौरेःप्रविष्टस्यबिलंजनाः॥प्रतीक्ष्यद्वादशाहा
निदुःखिताःस्वपुरंययुः॥३५॥निशम्यदेवकीदेवीरुक्मिण्यानकदुंदुभिः॥सुहृदोज्ञातयोऽशोचन्बि
लात्कृष्णमनिर्गतं॥३६॥सत्राजितंशपंतस्तेदुःखिताद्वारकौकसः॥उपतस्थुर्महामायांदुर्गांकृष्णो
पलब्धये॥३७॥तेषांतुदेव्युपस्थाना . . त्प्रसादिष्टाशिषासह॥प्रादुर्बभूवसिद्धार्थःसदारोहर्षय
न्हरिः॥३८॥उपलभ्यहृषीकेशंमृतंपुनरिहागतं॥सहपत्न्यामणिग्रीवंसर्वेजातमहोत्सवाः॥३९॥
सत्राजितंसमाहूयसभायांराजसंनिधौ॥प्राप्तिंचाख्यायभगवान्मणिंतस्मैन्यवेदयत्॥४०॥सचा
तिव्रीडितोरत्नंगृहीत्वाऽवाङ्मुखस्ततः॥अनुतप्यमानोभवनमगमत्स्वेनपाप्मना॥४१॥सोऽनुध्या
यंस्तदेवाऽघंबलवद्विग्रहाकुलः॥कथंमृजाम्यात्मरजःप्रसीदेद्वाऽच्युतःकथं॥४२॥किंकृत्वासाधुमह्यं

Indira Gandhi National
Centre for the Arts

।।भा०द०उ०।। हामणिं॥ तस्मिन्न्यस्याश्वमारुह्य शतयोजनगं ययौ॥१५॥ गरुडध्वजमारुह्य रथं रामजनार्द्दनौ
।।२०।। अन्वयातां महावेगैरश्वै राजन् गुरुद्रुहं॥१६॥ मिथिलायामुपवने विसृज्य पतितं हयं॥ पद्भ्याम
धावत्संत्रस्तः कृष्णोप्यन्वद्रवद्रुषा॥१७॥ पदातेर्भगवांस्तस्य पदातिस्तिग्मनेमिना॥ चक्रेण शि
र उत्कृत्य वाससोर्व्यचिनोन्मणिं॥१८॥ अलब्धमणिरागत्य कृष्ण आहाग्रजांतिकं॥ वृथा हतः श
तधनुर्मणिस्तत्र न विद्यते॥१९॥ तत आह बलो नूनं स मणिः शतधन्वना॥ कस्मिंश्चित्पुरुषे न्यस्त
स्तमन्वेष पुरं व्रज॥२०॥ अहं विदेहमिच्छामि द्रष्टुं प्रियतरं मम॥ इत्युक्त्वा मिथिलां राजन्विवेश यदु
नंदनः॥२१॥ तं दृष्ट्वा सहसोत्थाय मैथिलः प्रीतमानसः॥ अर्हयामास विधिवदर्हणीयं समर्हणैः
॥२२॥ उवास तस्यां कतिचिन्मिथिलायां समा विभुः॥ मानितः प्रीतियुक्तेन जनकेन महात्मना॥
ततोशिक्षद्गदां काले धार्त्तराष्ट्रः सुयोधनः॥२३॥ केशवो द्वारकामेत्य निधनं शतधन्वनः॥ अप्राप्तिं ।।राम।।
च मणेः प्राह प्रियायाः प्रियकृद्विभुः॥२४॥ ततः स कारयामास क्रिया बंधोर्हतस्य वै॥ साकं सुहृद्भि ।।२०।।
र्भगवान्या याः स्युः सांपरायिकाः॥२५॥ अक्रूरः कृतवर्मा च श्रुत्वा शतधनोर्वधं॥ व्यूषतुर्भयसंत्र

स्तौ द्वारकायाः प्रयोजकौ॥२६॥ अक्रूरे प्रोषितेऽरिष्टान्यासन्वै द्वारकौकसां॥ शारीरा मानसास्ता
पा मुहुर्द्दैविकभौतिकाः॥२७॥ इत्यंगोपदिशंत्येके विस्मृत्य प्रागुदाहृतं॥ मुनिवासनिवासे किं घटेता
ऽरिष्टदर्शनं॥२८॥ देवेऽवर्षति काशीशः श्वफल्कायागताय वै॥ स्वसुतां गांदिनीं प्रादात्ततोऽवर्षत्स्म
काशिषु॥२९॥ तत्सुतस्तत्प्रभावोऽसावक्रूरो यत्र यत्र ह॥ देवोऽभिवर्षते तत्र नोपतापा न मारिकाः
॥३०॥ इति वृद्धवचः श्रुत्वा नैतावदिह कारणं॥ इति मत्वा समानाय्य प्राहाक्रूरं जनार्द्दनः॥३१॥ पूजयि
त्वाऽभिभाष्यैनं कथयित्वा प्रियाः कथाः॥ विज्ञाताऽखिलचित्तज्ञः स्मयमान उवाच ह॥३२॥ ननु
दानपते न्यस्तस्त्वय्यास्ते शतधन्वना॥ स्यमंतको मणिः श्रीमान्विदितः पूर्वमेव नः॥३३॥ सत्रा
जितोऽनपत्यत्वाद्गृह्णीयुर्दुहितुः सुताः॥ दायं निनीयाऽपः पिंडान्विमुच्यर्णं च शेषितं॥३४॥ तथा
पि दुर्द्धरस्त्वन्यैस्त्वय्यास्तां सुव्रते मणिः॥ किंतु मामग्रजः सम्यङ्न प्रत्येति मणिं प्रति॥३५॥ दर्शय
स्व महाभाग बंधूनां शांतिमावह॥ अव्युछिन्ना मखास्तेऽद्य वर्त्तंते रुक्मवेदयः॥३६॥ एवं साम
भिरालब्धः श्वफल्कतनयो मणिं॥ आदाय वाससाछन्नं ददौ सूर्यसमप्रभं॥३७॥ स्यमंतकं

Indira Gandhi National
Centre for the Arts

